**जौलायन** पु० जुलस्यापत्यम् इञ् तत इञन्तत्वात् यूनि फञ् । जुलस्य यून्यपत्ये । ततः ऐषुकार्य्या० विषयार्थे भक्तल् । जौलायनभक्त तदीयविषये त्रि० ।

**जौहव** त्रि० जुह्वामवदाने योग्यम् जुहू—अण् । जुहूपदार्थेऽवदानयोग्येषु हृदयादिषु “हृदयं जिह्वां क्रोडं सव्यसक्थिपूर्वनडकं पार्श्वे यकृद्वृक्कौ गुदमध्यं दक्षिणा श्रोणिरिति जौहवानि” कात्या० श्रौ० ६।७।६।“जुह्वामवदानयोग्यानि प्रधानयागसाधनानि” कर्कः ।

**ज्ञ** पु० ज्ञा—क । १बुधग्रहे “युगे सूर्य्यज्ञशुक्राणां खचतुष्करदार्णवाः” सू० सि०। २पण्डिते “क्रियासु बाह्यान्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः” प्रश्नो०। ३ब्रह्मणि ४मङ्गलग्रहे च धरणिः । सुपि उपपदे तत्तत्पदार्थज्ञातरि त्रि० । “आदेशं देशकालज्ञः” रघुः “विधिज्ञो विधिमास्थाय” त्रि० त० । स्वार्थे क । ज्ञक ज्ञातरि त्रि० स्त्रियां वा अत इत्त्वम् ज्ञका ज्ञिका ।

**ज्ञप** मारणे, आलोके, निशाने, तोषणे स्तुतौ च चुरा० उभ० सक० सेट् घटा० । ज्ञपयति-ते अजिज्ञपत्-त । ज्ञाकम इत्यनेनैवेष्टसिद्धौ ज्ञपपाठश्चुरादिरुभयपदीति मते फलवत्कर्त्तरि परस्मैपदार्थः इति धातुप्रदीपः । वस्तुतस्तु ज्ञप्तिपदमनेनैव निष्पादितम् । तेन अनिर्दिष्टार्थतया ज्ञप्तिरिह ज्ञानम् । अतएव प्रच्छौ श ज्ञीप्से इत्यत्र अस्यैव सनन्तस्य निष्पादितेन ज्ञीप्सशब्देन ज्ञातुमिच्छा प्रतिपाद्यते । एवं ज्ञानपर्य्याये “प्रतिपज्ज्ञप्तिचेतना इत्यमरः” इति दुर्गादासः । ज्ञप ज्ञाने च इति पाणिनिः । अधिकं ज्ञाधातौ वक्ष्यते ।

**ज्ञपित** त्रि० ज्ञप—ज्ञाने क्त नि० वा इट् । ज्ञाते अमरः । इड्भावे । ज्ञप्तोऽप्यत्र ।

**ज्ञप्ति** स्त्री ज्ञप—भावे क्तिन् । १बुद्धौ अमरः २मारणे ३तोषणे ४तीक्ष्णीकरणे ५स्तुतौ च ।

**ज्ञा** बोधे क्र्या० पर० सक० अनिट् । जानाति अज्ञासीत् । जज्ञौ । ज्ञाता ज्ञानं ज्ञातिः ज्ञातः जज्ञिवान् ।

अनु+अनुमतौ अनुमतिश्च स्वयंप्रवृत्तस्य निषेधनाभावेन स्वाभिमतत्वज्ञापनेन प्रवर्त्तनम् । “तं देवासो अनुजानन्तु कामम्” तैत्ति० ब्रा० । “अनुप्रवेशे यद्वीर कृतवांस्त्वं ममाप्रियम् । सर्वं तदनुजानामि” भा० आ० २१३अ०

अप+निह्नवे आत्म० । आत्मानमपजानानः शशमात्रोऽनयद्दिनम्” भट्टिः ।

अभि+सम्यग्ज्ञाने “भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः” गीता ।“अभिज्ञाश्छेदपातानाम्” कुमा० अभिज्ञा च आद्यज्ञानम् अनुभवात्मकम् ।

प्रति+अभि+पूर्वदृष्टस्य वस्तुनः चक्षुरादिसन्निकर्षजे पूर्वसंस्कारोत्पन्ने स्मृतिभिन्ने ज्ञानभेदे यथा सोऽयं देवदत्तः इत्यादि ज्ञानम् । “तं त्वं प्रत्यभिजानीहि स्वप्ने यं दृष्टवत्यसि” हरिवं० १७६ अ० ।

सम्+अभि+प्रत्यभिज्ञाने “इन्द्रसेनां सह भ्रात्रा समभिज्ञाय वाहुकः” भा० व० ७५ अ० ।

अव+अनादरे हीनत्वेन ज्ञाने च ।“अवजानासि मां यस्मात् ततस्ते न भविष्यति” रघुः।“अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तत्तामससुदाहृतम्” गीता । “वस्तूनि देशांश्च विवर्त्तयिष्यन् रामं नृपः संगिरमाण एव । तथावजज्ञे” भट्टिः ।

आ+सम्यग्ज्ञाने नियोगे च “न हि मनसा ध्यायतः कश्चनाजानाति” शत० ब्रा० ४।६।७।५ । “नियोगश्च निकृष्टस्य भृत्यादेः प्रवर्त्तनम् । स्वार्थे णिच् तत्रार्थे । “आज्ञापय ज्ञातविशेष ! पुंसाम्” कुमा० । ज्ञा—प्रेरणे चौरादिकस्येदं रूपमित्यन्ये ।

उप+आद्यज्ञाने “उप तज्जानीत यथा वयमिहाप्यसामेति” शत० ब्रा० ६।२।३।७। “उपज्ञा ज्ञानमाद्यं स्यात्” अमरः।

निस्+निर्+निश्चयात्मके ज्ञाने । “विद्युद्धै विद्युत्य दृष्टिमनुप्रविशति सान्तर्धीयते तां न निर्जानन्ति” ऐत० ब्रा० ।

परि+परितो ज्ञाने “इन्द्रो दक्षं परिजानादहीनम्” ऋ० १०। १३८।६।“अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः” मनुः।

प्र+प्रकृष्टज्ञाने । “यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च । अयथावत् प्रजानाति” “तस्य प्रज्ञा प्रतिष्ठिता” गीता ।

प्रति+प्रतिज्ञायां साध्यत्वेन पक्षनिर्देशे आत्मकर्त्तव्यत्वेन कथनभेदे च आत्म० । “साध्यनिर्देशः प्रतिज्ञा” गौत० सू० । साध्यवत्त्वेन पक्षनिर्देशः प्रतिज्ञेति तदर्थः । “प्रतिजज्ञे वधं चापि सर्वक्षत्रस्य भारत !” भा० व० ११७ अ० ।। “प्रतिज्ञाय वनवासमिमं गुरोः” रामा० २।१०८ अ० ।“तस्मै निशाचरैश्वर्य्यं प्रतिजज्ञे रघूत्तमः” रघुः। “कच्चिन्न पाने द्यूते वा क्रीड़ासु प्रमदासु च । प्रतिजानन्ति पूर्वाह्णे व्ययं व्यसनजं तव” भा० स० ५ अ० । आर्षत्वात् पर० ।

वि+विशेषण ज्ञाने “ज्योतिर्वृणीत तमसो विजानन्” ऋ० ३।३९।७।“आत्मानं चेद्विजानीयादयमस्मीति पूरुषः” शत० ब्रा० १४।७।२।१६ । “कथमेतद् विजानीयां त्व-